# svarama njarI text with trans explaining Vedic accents

# स्वरमञ्जरी

## Document Information

Text title : svaramaJNjarI

File name : svaramanj.itx

Category : misc, sAhitya, svara, veda

Location : doc_z_misc_general

Transliterated by : Avinash Sathaye sohum at ms.uky.edu

Proofread by : Avinash Sathaye sohum at ms.uky.edu

Description-comments : text + trans. on Vedic accents, grammar rules related to accents (by Tryambak B. Abhyankar)

Latest update : November 1, 2010

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 17, 2025

*sanskritdocuments.org*

# स्वरमञ्जरी

स्वरमञ्जरी अर्थात् अष्टविकृत्युपेता
॥ संहिता-पदपाठविमर्शसहिता वैदिकस्वरपद्धतिः ॥
(लेखकः - वे. शा. सं. गीर्वाणभूषण त्र्यंबक बलवंत अभ्यंकर, बी. ए. [ संस्कृत ऑ।] पुणे।)
॥ प्रथमगुच्छः - स्वरप्रक्रियात्मकः ॥

मङ्गलम् (Invocation:)

नानानामधरं लोके लोकानामभयंकरम् ।
सदाशिवस्वरूपं तं त्र्यंबकं प्रणमाम्यहम् ॥ १॥

Translation :

I bow before the three-eyed God Shiva with auspicious features who has many different names and
protects the people of the worlds.

स्वरमहत्त्वम् (Importance of the accents)

श्रीर्वै स्वरश्च वेदानामर्थबोधः सुखं स्वरात् ।
शुद्धपाठः स्वरादेव स्वरज्ञो लभते परम् ॥ २॥

Translation:

Accents are the precious features of the Vedas, it is easy to know the meaning through the accents, also the expert in the accents acquires the proper intonation of the Vedas through their use.

ग्रंथप्रयोजनम् (Purpose of this book.)

स्वरज्ञानप्रवेशाय द्विजानां वेदपाठिनाम् ।
त्र्यंबकीयामिमां वक्ष्ये वैदिकस्वरपद्धतिम् ॥ ३॥

भगवान् पाणिनिर्वेत्ति स्वरशास्त्रमहार्णवम् ।
उडुपं मत्कृतिर्भूयात् तरितुं तं सुदुस्तरम् ॥ ४॥

सुसूक्ष्मविषयस्यास्य शास्त्रीयप्रतिपादने ।
न तथास्ति कृतो यत्नो यथा बालावबोधने ॥ ५॥

Translation:
I will describe my (त्र्यंबकीय) system of accents to introduce the Vedic students to the science of the accents. Lord Panini knows the whole ocean of this science, let my work serve as a boat to cross this difficult ocean! (To date) no effort like this has been made to make the technical discussion of this subtle subject accessible to a layman.

स्वरितवाङ्मयम् (Accented literature)

संहिताः सर्ववेदानां ब्राह्मणं तैत्तिरीयकम् ।
सारण्यकं शतपथं वाङ्मयं स्वरितं स्मृतम् ॥ ६॥

भिन्नानि स्वरचिह्नानि यदि शाखासु कासुचित् ।
समानैवास्ति सर्वेषां वेदानां स्वरपद्धतिः ॥ ७॥

Translation:
The list of books which use the accent-system consists of all Vedas, TaittirIya BrAhmaNa and AraNyaka and Shatapatha. In different branches, the notational system may be varied, but the accent system is uniformly the same!

स्वरभेदाः (Different Accents)

उदात्तश्चानुदात्तश्च वस्तुतश्च द्विधाः स्वराः ।
स्वरितः प्रचयश्चास्तेऽनुदात्तः स्थानभेदतः ॥ ८॥

उदात्तमुच्च इत्याहुर्नीच इत्यनुदात्तकम् ।
समाहारस्तयोर्जात्यस्वरितश्च निगद्यते ॥ ९॥

Translation:
Their are mainly two accents UdAtta ( Acute ) and AnudAtta (Grave). Others called Svarita (Circumflex) and Pracahya are in reality AnudAtta in special positions. UdAtta is described as “high” and AnudAtta as “low”. Their combination (in one syllable) is described as JAtyasvarita (Independent Svarita ).

स्वरक्रमः (List of Accents)

अनुदात्त-उदात्तश्च-स्वरितः प्रचयः क्रमात् ।
उदात्तादितरे सर्वे निहता इति संस्मृताः ॥ १०॥

Translation:

AnudAtta, UdAtta, Svarita and Prachaya is the list of accents. All except UdAtta are known as Nihata (lowered at the end).

उदात्तमहत्त्वम् (Importance of UdAtta)

उदात्तो ध्रुव एतेषामुदात्तालंबिनोऽपरे ।
उदात्त एक एवास्ति निश्चितश्च पदे पदे ॥ ११॥

Translation:

UdAtta is central to this system, all others depend on it! Each Pada contains at most one UdAtta.

Note: Pada पद denotes an individual word unit that the saMhitA संहिता - or the continuous text) is usually broken into. Several padas join to make a pAda पाद. Usually two pAdas make up a RichA ऋचा, the basic unit of the sUkta सूक्त. The version where the padas are listed separately is known as padapAtha पदपाठ and the accent rules for it are described below.

वेदभेदादुदात्तः (variation of the UdAtta symbols)

उद्रेखित उदात्तोऽस्ति मैत्रायां काठके तथा ।
उदेकाङ्कान्वितः साम्नि रेखितोऽधः शते पथे ॥ १२॥

शाखायां तैत्तिरीयायामृग्वेदाथर्ववेदयोः ।
तथा वाजसनेय्यां च चिह्नहीन उदात्तकः ॥ १३॥

Translation:

The UdAtta is marked with a superscript bar in MaitrAyaNI and KAThaka. It has a superscript 1 in the SAmaveda and in Shatapatha it is underlined. In TaittirIya, Rigveda and Atharvaveda as well as VAjasaneya, it is unmarked.

स्वरचिह्नानि (The accent symbols)

उदात्तोऽचिह्नितो नित्यं प्रचयश्चाप्यचिह्नितः ।
उद्रेखितश्च स्वरितो रेखितोऽधोऽनुदात्तकः ॥ १४॥

कोशादेवावगन्तव्यं किमुदात्तं पदेऽक्षरम् ।
उदात्ते चैकदा ज्ञाते ज्ञायन्ते च पदस्वराः ॥ १५॥

Translation:
(Except as noted above,) the UdAtta is unmarked and so is the Prachaya. The svarita has a superscripted bar and AnudAtta is underlined.
Note: This describes the main Rigveda system and others when they correspond.
In general, the notations need to be checked for individual books. Unless otherwise stated, the Rigveda system is described here.
To know which syllable is UdAtta, you need to consult appropriate references. Once an UdAtta is recognized, the rest of accents in a Pada are known.
Note: A syllable means a full letter consisting of a consonant combination with the trailing vowel or what constitutes a full letter अक्षर.
अनुदात्तः (AnudAtta)

उदात्तपूर्वतः सर्वेऽनुदात्ता रेखिता अधः । - वैश्वानरः ।

Translation:
All AnudAttas before an UdAtta are underlined.
स्वरितः (Svarita)

उदात्तोत्तरतश्चाद्योऽनुदात्तः स्वरितस्वरः ॥ १६॥ - पुरोहितम् ।

Translation:
The first AnudAtta after an UdAtta is a Svarita.
प्रचयः (Prachaya)

स्वरितोत्तरतः सर्वेऽनुदात्ताः प्रचयाः स्मृताः । - इमं मे गंगे यमुने ।

Translation:
All AnudAttas (in a string) following a Svarita are known as Prachaya
सन्नतरः (Sannatara)

प्रचयोऽन्यपदोदात्तपरः सन्नतरः स्मृतः ॥ १७॥ - सरस्वति शुतुद्रि ।

Translation:

A Prachaya (in one Pada) followed by an UdAtta in the next Pada is known as Sannatara.

उदात्तः (Recognition of UdAtta)

प्रायः स्वरितपूर्वस्थोऽनुदात्तोत्तरतोऽपि वा ।
उदात्तोऽचिह्नितो नित्यं तद्युक् चानिहतं पदम् ॥ १८॥ - मीढुषे ।

Translation:

Generally, an unmarked syllable just before a Svarita or just after an AnudAtta is UdAtta.
The pada with an UdAtta is known as Anihata (not fully lowered).

जात्यः (Recognition of the JAtya)

निर्दिष्टात् स्वरितादन्यः स्वरितो जात्यनामकः ।
विविधं चिह्नितो वेदे सदैवोदात्तसदृशः ॥ १९॥

ऋग्वेदे तैत्तिरीयायां स चाप्युद्रेखितः पुनः ।
नीचात् परः पदादौ वा स्वरितो यः स जात्यकः ॥ २०॥ - वीर्यम् । स्वः ।

Translation:

There is a Svarita which arises in a different manner
( i.e . without the UdAtta interaction as described above) and its is known as
JAtya (Indepndent). It is marked differently in various Vedas and appears similar
to an UdAtta (in intonation).
In Rigveda and TaittirIya, it is superscripted with a bar.
Any Svarita which appears right after a NIcha (low - or unchanged AnudAtta)
or in the beginning of a Pada (must be) a JAtya Svarita.

स्वरपरिवर्तनम् (Special transformations of accents)

नित्यं यात्यनुदात्तत्वं यदन्योदात्तपूर्वतः ।
स्वरितः प्रचयश्चैव यश्च सन्नतरस्ततः ॥ २१॥ - नमो हिरण्यबाहवे । पतये नमः ।

Translation:

A Prachaya or a Svarita which appears just before an UdAtta becomes an AnudAtta and
hence is a Sannatara.

स्वरसन्धयः (Vowel joins across Padas)

उच्चेन परभूतेन सन्धिर्नित्यमुदात्तकः ।
तथैव पूर्वभूतेन यदि जात्यो न संभवेत् ॥ २२॥ - त्रीणि+एकः = त्रीण्येकः । नावा+इव=नावेव ।

Translation:
If an UdAtta or AnudAtta syllable joines with the following UdAtta (vowel), then the joined syllable becomes UdAtta.
If an UdAtta syllable joins with the following UdAtta or AnudAtta (vowel), then the joined syllable becomes UdAtta, unless it becomes a JAtya Svarita (as described below).
जात्योत्पत्तिः (Creation of the JAtya)

उदात्तपूर्वकः सन्धिर्यद्युदात्तानुदात्तयोः ।
स चाभिनिहित-क्षेप्र-प्रश्लिष्टात्मक एव चेत् ॥ २३॥

उदात्तसदृशो जात्यस्तदैवोत्पद्यते सदा ।
अत्युच्चं तस्य पूर्वार्धं परार्धं प्रचयात्मकम् ॥ २४॥

Translation:
A join as discussed above becomes a JAtya if the corresponding join is one of the three types known as Abhinihita, Kshaipra, or PrashliShTa described below . the JAtya which is thus created has the first part much higher and the second like a Prachaya and generally sounds UdAtta.
जात्यभेदः (Classes of JAtya)

स जात्यस्वरितश्चास्ति भेद्योऽभेद्य इति द्विधा ।
अभेद्यः पदसंभूतो भेद्यश्च द्विपदोत्थितः ॥ २५॥ - राजन्यः । सोऽकामयत ।

Translation:
This JAtya is called indivisible, if it arises within a Pada, while it is divisible if it comes due to joining two Padas.
क्षैप्रः (Kshaipra)

उदात्तस्यानुदात्तस्य यदा संधिर्यणात्मकः ।
क्षैप्रनामा तदा जात्यस्वरितः सर्वदा भवेत् ॥ २६॥ - त्रि+अंबकम्=त्र्यम्बकम् ।

Translation:
If an UdAtta and AnudAtta join creats YaN (the consonants y, v, r, l), then the resulting

JAtya is known as Kshaipra.

प्रश्लिष्टः (PrashliShTa)

स संधिस्तु यदा भूयात् ह्रस्वेकारद्वयोत्थितः ।
प्रश्लिष्टसंज्ञको जात्यः शाकल्यमततो भवेत् ॥ २७॥ - दिवि+इव = दिवीव ।

Translation:

If the join comes from two short i, then according to ShAkalya, it is called PrashliShTa.

अभिनिहितः (Abhinihita)

ए-अ-स्वरात्मकः स्याच्चेत् संधिः सोऽवग्रहान्वितः ।
तदाभिनिहितो नाम जात्यस्वरित उच्यते ॥ २८॥

- ये+अंतरिक्षे = येंऽतरिक्षे । यः+अस्मान्=योऽस्मान् ।

Translation:

If the join is a combination of e and a resulting in an Avagraha, then it is known as Abhinihita.

कम्पः (Kampa)

जात्यश्च कम्पते नित्यं जात्योच्चौ परतो यदि ।
जात्यश्चेतद् ह्रस्ववर्णान्तस्तन्मध्यैकाङ्कमालिखेत् ॥ २९॥ - अप्स्व kप् न्तः ।
जात्यश्चेद्दीर्घवर्णान्तस्तन्मध्ये त्र्यङ्कमालिखेत् ।
उदधोरेखितं कार्यं सदैतच्चाकृतिद्वयम् ॥ ३०॥ - ओक्येKप् सोमम् ।
कम्पो विलिख्यते चैवमृग्वेदाथर्ववेदयोः ।
विविधं चिह्न्यतेऽन्यत्र तत्रतत्रावलोकयेत् ॥ ३१॥

शाखायां तैत्तिरीयायां जात्यो जात्यात्परो यदि ।
अधोरेखं तयोर्मध्ये नित्यमेकाङ्कमालिखेत् ॥ ३२॥ - वीर्यं १ व्यभजत् ।

Translation:

Any JAtya followed by another JAtya or UdAtta vibrates or acquires a Kampa.

If the JAtya is a short vowel, then insert a number 1 between them (it and the following JAtya or UdAtta) and in case it is long, insert the number 3. These numbers are to be marked with the superscript bar as well as the underline . In Rigveda and Atharvaveda, Kampa is denoted thus . For variations in other books, look therein . In TaittirIya, an underlined

1 is written between two JAtya Svaritas.

स्वरितो द्विविधः (Svarita Types)

एवं च स्वरितश्चास्ते शुद्धो जात्य इति द्विधा ।
उदात्ताच्च परः शुद्धः स्वरूपेणानुदात्तकः ॥ ३३॥ -मानोऽवधीः ।
स्वरितत्वं चलं तस्य पूर्वोदात्तवशं यतः ।
नीचत्वं च पुनर्गच्छेत् परतश्चेदुदात्तकः ॥ ३४॥ -मानो गोषु ।

Translation:

Svarita is classified as Shuddha (Pure or depenedent) or JAtya (Independent).

The Pure or dependent Svarita is naturally an AnudAtta occuring after an UdAtta.

Its property of being a Svarita is thus unstable since it depends on the prior UdAtta.

Moreover,

it becomes NIcha (AnudAtta) if it is further followed by an UdAtta.

जात्यस्वरितः (Independent Svarita)

नीचात्परः पदादौ वा स्वरूपेणोभयात्मकः ।
स्वयं च स्वरितो जात्य उच्चतुल्यश्च कंपवान् ॥ ३५॥ -राजन्यः । क्व ।

Translation:

The JAtya Svarita is naturally created (as described) in the beginning of a Pada or after a NIcha (AnudAtta), is similar to an UdAtta in sound and has Kampa (following it).

उदात्तप्रचययोर्विशेषः (Distinguishing UdAtta and Prachaya)

उदात्तः स्वरितात्पूर्वः प्रचयः स्वरितात्परः ।
प्रचयो याति नीचत्वं परतश्चेदुदात्तकः ॥ ३६॥ -नमस्ते । धृतव्रतो वरुणः ।

Translation:

UdAtta occurs before a Svarita, while Prachaya occurs after it . Prachaya followed by an UdAtta becomes NIcha.

स्वरोच्चारः (Pronunciation)

उदात्तश्चानुदात्तश्च स्वरितश्च त्रयः स्वराः ।
उच्चैर्नीचैस्तथा तिर्यक् त उच्यन्तेऽक्षराश्रयाः ॥ ३७॥

स्वरानुच्चारयेत् स्पष्टं नातिदूरं च तान् नयेत् ।
स्वरोच्चारः कथं कार्यः श्रोतव्यं तद्गुरोर्मुखात् ॥ ३८॥

Translation:

The three accents UdAtta, AnudAtta and Svarita can be (roughly) described as High, Low and

Across (High-low) and are attached to the whole syllables.

The accents should be clearly enunciated and should not be stretched too much (should not be made too high or too low). The actual method must be learned from the Guru directly!

॥ स्वरमञ्जर्यां द्वितीयगुच्छः ॥

क्रियापदस्वराः:-

आदौ वाक्यस्य पादस्य क्रियापदमुदात्तकम् ।
मध्ये सहेतुकं हन्तचनेद्धिकुविदन्वितम् ॥ ३९॥

यस्मादामन्त्रितं वाक्ये नान्तर्भवितुमर्हति ।
उच्चं क्रियापदं वाक्यादिस्थसंबोधनात्परम् ॥ ४०॥ - अग्ने नय ।
निरुदात्तमनादिस्थं मुख्यवाक्यक्रियापदम् ।
उपसर्गः पदं भिन्नं चोपसर्ग उदात्तकः ॥ ४१॥ त्र्यंबकं यजामहे । इदं विष्णुर्विचक्रमे ।
उदात्तकं सदैवास्ते गौणवाक्यक्रियापदम् ।
क्रियापदपदाङ्गश्चेदुपसर्गोऽनुदात्तकः ॥ ४२॥ - य ईशे अस्य । यतो विष्णुर्विचक्रमे ।
यदि तौलनिकोक्तिश्चेदाद्यवाक्यक्रियापदम् ।
उदात्तकं भवेद्यस्मात्तद्वाक्यं गौणमुच्यते ॥ ४३॥

उदा । अजोह्येकोजुषमाणोऽतु शेते जहात्येनां भुक्तभोगाभजोऽन्यः ॥

तयोरन्यः पिप्पलं स्वाद्वत्ति ॥

यद्येककर्तृकाः सन्ति वाक्ये च बहुलाः क्रियाः ।
विनाद्यामुच्चकाः शेषास्ताभ्यो वाक्यं नवं यतः ॥ ४४॥ तरणिरिञ्जयति क्षेति पुष्यति ।

Translation:

संबोधनस्वराः:-

संबोधनमनादिस्थं निहतं चेदहेतुकम् ।
वाक्यारम्भे च पादादौ त्वाद्यवर्णे उदात्तकम् ॥ ४५॥ - नमस्ते रुद्र । प्रजापते न त्वदेतान्यन्यो ।
वाक्यारम्भस्थितानेकसंबुद्धय उदात्तकाः ।

प्रायोऽनुदात्तकं विद्यात् संबोधनविशेषणम् ॥ ४६॥ - द्रापेअन्धसस्पते दरिद्रत् । पृथिवि मातः ।

Translation:
समासस्वराः:-
प्रधानं यत्पदं चास्ते समासे तदुदात्तकम् ।
पदद्वयं प्रधानं चेत् पदद्वयमुदात्तकम् ॥ ४७॥

उदात्तकं पदं चान्त्यं प्रायस्तत्पुरुषादिषु । - इन्द्र-शत्रुः ।
आम्रेडितसमासे च पदमाद्यमुदात्तकम् ॥ ४८॥ द्यविद्यवि ।
बहुव्रीहिसमास्य पूर्वं पदमुदात्तकम् ।
पुरु-द्वि-त्रि-सु-नञ्-तुव्यन्वितस्यान्त्यमुदात्तकम् ॥ ४९॥ - वज्रबाहुः । इन्द्रशत्रुः । त्रिनाभि ।

Translation:
dव्यु दात्तकाः:-
प्रायेण देवताद्वन्द्वे पदद्वयमुदात्तकम् । - द्यावापृथिवी ।
परन्तु चाव्ययद्वन्द्वे पूर्वं पदमुदात्तकम् ॥ ५०॥ - सायंप्रातः ।
यदि षष्ठीविभक्त्यङ्गं समासप्रथमं पदम् ।
उदात्तकं तदा भूयात् तत्समासपदद्वयम् ॥ ५१॥- बृहस्पतिः । शुनः शेपः । ब्रह्मणस्पतिः ।
तवै-प्रत्ययुक्षब्दस्यादिश्चान्त उदात्तकः । - एतवै ।
नराशंसो dव्यु दात्तः स्यात्तद्वदेव शचीपतिः ॥ ५२॥ - शचीपतिः ।

Translation:
उपसर्गस्वराः:-
विंशतेरुपसर्गाणामुच्चा एकाक्षरा नव ।
अन्तोदातः स्मृतोऽभीति दशान्ये चाद्युदात्तकाः ॥ ५३॥

Translation:
सर्वदानुदात्तकाः:-
संबोधनं तथा नित्यं मुख्यवाक्यक्रियापदम् ।
यदा न वाक्यपादादौ तदा तन्निरुदात्तकम् ॥ ५४॥ - इमं मे गङ्गे यमुने । गणपतिं हवामहे ।
सर्वनाम्नां च रूपाणि यानि वैकल्पिकानि तु ।

ईम्-सीम्-यथा च वाक्यान्ते निपाता निरुदात्तकाः ॥ ५४ अ ॥ -या त इषुः । विशो यथा ।
उदात्तका निपातेषु नूनं ह्येवं किलादयः ।
नु-सु-हीति पदेभ्यश्च कम् शब्दो निहतः परः ॥ ५५॥

अस्येति प्रथमादेश उदात्तं स्मर्यते पदम् ।
अन्वादेशेऽनुदात्तं तद्यदि चेद्वाक्यमध्यगम् ॥ ५६॥ -य ईशे अस्य द्विपदः । अथो ये अस्य सत्वानः ।

Translation:

॥ स्वरमञ्जर्यां तृतीयो गुच्छः । इतरवेदस्वराः ॥

मैत्रायणीकाठकस्वराः:-
मैत्रायणीकाठकयोरुदात्तस्तूर्ध्वरेखितः ।
उदात्ते चैकदा ज्ञाते ज्ञायन्त इतरस्वराः ॥ ५७॥

ते देवा रात्रिमसृजन्त । (ते देवा रात्रिमसृजन्त ।)
अधोऽर्धवक्रितो जात्योऽनुदात्तः परतो यदि ।
अचिह्नितस्त्र्यङ्कपूर्वः परतश्चेदुदात्तकः ॥ ५८॥

अधोबिन्दुयुतश्चास्ते काठके स्वरितः पुनः ।
अधःकीलाङ्कितो जात्यः परतश्चेदुदात्तकः ॥ ५९॥

Translation:

शतपथस्वराः:-
नूनं शतपथे भूयात् केवलोदात्तदर्शनम् ।
उदात्तः स्यादधोरेखाङ्कितः शतपथे सदा ॥ ६०॥- अथ तृणैः परिस्तृणाति ।
क्रमेण चेद् बहूदात्तास्तेषामन्त्यस्तु चिह्न्यते ।
उदात्तचिह्नमाप्नोति वर्णो जात्यपरोऽपि च ॥ ६१॥ -स तपोऽतप्यत । मनुष्यः ।

Translation:

सामवेदस्वराः:-
सामवेदे स्वराः सर्वे वर्णोपर्यङ्कदर्शिताः ।
एकाङ्कचिह्नितो वर्णः सामवेद उदात्तकः ॥ ६२॥

त्र्यङ्काङ्कितोऽनुदात्तश्च स्वरितो dव्य ङ्कचिह्नितः ।
dव्य ङ्काङ्कित उदात्तोऽपि परतः स्वरितो न चेत् ॥ ६३॥

dव्यु दात्तपूर्वः स्वरितो रकारdव्य ङ्कचिह्नितः ।
एकाङ्कयुक्तयोराद्यश्चिह्नहीनो द्वितीयकः ॥ ६४॥

यदि द्वाभ्यामुदात्ताभ्यामनुदात्तः परस्तदा ।
उकारdव्य ङ्कयुक् चाद्यो द्वितीयः स्यादचिह्नितः ॥ ६५॥

जात्यस्वरित एवापि रकारdव्य ङ्कचिह्नितः ।
जात्यात्पूर्वोऽनुदात्तस्तु ककारत्र्यङ्कचिह्नितः ॥ ६६॥

त्र्यङ्कोत्तरो dव्य ङ्कयुक्तो जात्य उच्चपरो यदि ।
प्रचयोऽचिह्नितश्चास्ते सामवेदेऽपि सर्वदा ॥ ६७॥

Translation:

॥ चतुर्थो गुच्छः । संहितापदपाठविमर्शः ॥

पदपाठः (On PadapATha)

पादो मानं संहितायां पदं मानं पदेषु च ।
एकत्र्यङ्कात्मकः कम्पः पदपाठे न चास्त्यतः ॥ ६८॥

Translation:

The unit in the SaMhitA (continuous text) is PAda, while it is Pada in the PadapATha.
The Kampa with the numbers 1,3 does not exist in the PadapATha, because of this.

संहितापाठात् पदपाठः (Conversion to PadapATha)

अधोरेखाङ्कितान् कुर्यात् स्वरितान् प्रचयानपि ।
ततः पदानि विगृह्य सर्वाणि च पृथक् लिखेत् ॥ ६९॥

उदात्तं च ध्रुवं कृत्वा लिखेत् प्रतिपदं स्वरान् ।
यदि कश्चित्तत्र जात्यस्तं यथैव तथा लिखेत् ॥ ७०॥

छान्दसं यदशुद्धं स्यात् शुद्धं कृत्वा तु तल्लिखेत् ।
वैशिष्ट्यानि च सर्वाणि पदपाठस्य दर्शयेत् ॥ ७१॥ - (सं।) श्रुधी (प।) श्रुधि

Translation:

To convert to PadapATha from SaMhitA, put underlines under the Prachaya and the Svarita.

Then break up the Padas and write them separately . Each Pada should be writeen and marked

using the central UdAtta . If some JAtya occurs, it should be marked as such . If anything is
metrically incorrect, it should be restored properly and written down . The various special features and terms of the PadapATha should be then added.

पदपाठात् संहितापाठः (Conversion to SaMhitA)

वैशिष्ट्यानि च सर्वाणि पदपाठस्य लोपयेत् ।
अधोरेखाङ्कितान् कुर्यात् स्वरितान् प्रचयांस्तथा ॥ ७२॥

कुर्याच्च पदसंयोगं सन्धिशास्त्रानुसारतः ।
उदात्तकान् ध्रुवं कृत्वा रचयेत् स्वरपद्धतिम् ॥ ७३॥

एकत्र्यङ्कात्मकं कम्पं योग्यस्थाने समालिखेत् ।
छन्दोयोग्यं ह्रस्वदीर्घादिकं सर्वं प्रकल्पयेत् ॥ ७४॥

Translation:
The special features and terms of the PadapATha should be dropped . The Svarita and Prachaya
should be underlined and then the Padas should be joined according to the Sandhi Rules . By
paying attention to the central UdAttas, the whole marking system of the accents should be created . The Kampa marks should be introduced and the short or long vowels adjusted to the
meters.

॥ पञ्चमो गुच्छः । पदपाठीयवैशिष्ट्यानि ॥

समासविचारः:-
शब्दं सामासिकं विद्यान्नित्यमेकपदात्मकम् ।
अवग्रहान्वितं कुर्यात् समासस्य च विग्रहम् ॥ ७५॥ - बज्रऽबाहुः ।
नैव द्वन्द्वसमासस्य विग्रहः क्रियते कदा ।
इवेन च समासो हि स शब्दश्च विगृह्यते ॥ ७६॥ - मित्रावरुणौ । वत्संऽइव ।
निषेधकं चाक्षरं अ न कदापि वियुज्यते ।
प्रेगृह्यान्तसमासस्य विग्रहेश्चेत्यनन्तरम् ॥ ७७॥ - अहस्तः । सुदानू इति सुऽदानू ।

Translation:
प्रगृह्यविचारः:-

ई-ऊ-ए चास्ति प्रगृह्यो नित्यं द्विवचनस्य च ।
एकारान्तं द्विवचनं मध्यमोत्तमयोस्तथा ॥ ७८॥ -हरी इति । ममाते इति ।
अस्मे-युष्मे-अमी-त्वे च प्रगृह्याः सर्वनामसु ।
प्रगृह्यान्तान् सदा शब्दान् इति शब्देन दर्शयेत् ॥ ७९॥ -अस्मे इति । त्वे इति ।
ओकारान्ता च सम्बुद्धिरोकारान्तो निपातकः ।
रेफात्मकविसर्गश्चेदितिशब्देन युज्यते ॥ ८०॥ -कारो इति । उषो इति । पुनरिति । अकरित्यक ।
सानुस्वारश्च दीर्घश्च इतियुक्तो निपात उ ।
पदपाठीय इतियुक् शब्द एकपदात्मकः ॥ ८१॥ -ऊं इति । रोदसी इति ।

Translation:

प्रत्ययविचारः:-

प्रत्ययास्त्रा-तर-तमा मत्-वत्-भ्यां-भ्यः-सु-भिस्तथा ।
विगृह्यन्ते यदि स्याच्चेद् मूलरूपं यथातथम् ॥ ८२॥ -पुरुषऽत्रा । गोऽमतीः । रश्मिऽभिः
अवग्रहः सदामध्ये धातुरूपो-पसर्गयोः ।
नहि-नक्यादयः शब्दा नित्यमेकपदात्मकः ॥ ८३॥ -विऽस्थितः । नहि । नकिः ।

Translation:

तैत्तिरीयविशेषाः:-

विशेषाः पदपाठीयास्तैत्तिरीया अधस्तनाः ।
मुख्यक्रियोपसर्गाणां नेदिष्ट इतिशब्दभाग् ॥ ८४॥ -अभि । समिति । नमंतु ।
यानि विग्रहयोग्यानि संहितायां पदानि च ।
अवग्रहान्वितस्तेषां विग्रहश्चेत्यनन्तरम् ॥ ८५॥ -महेन्द्र इति महाऽइन्द्रः । वर्मभिरिति वर्मऽभिः ।
अवग्रहात् परं शब्दं भिन्नं मत्वा स्वरं लिखेत् ।
इव-शब्दः पदं भिन्नं द्वन्द्वस्यापि च विग्रहः ॥ ८६॥- अनुमत्या इत्यनुऽमत्यै ।

Translation:

॥ षष्ठो गुच्छः । वेदार्थविचारः ॥

:-

पदानि पूर्वं जानीयात् पदस्वरमनन्तरम् ।
उपसर्गान् क्रियाशब्दैः संयोज्यार्थं प्रदर्शयेत् ॥ ८७॥

अर्थ-स्थानवशान्नित्यं शब्दानामुच्चनीचता ।

उदात्तानुगुणश्चार्थो दर्शनीय इति स्थितिः ॥ ८८॥

स्थानार्थयोरभेदे तु शब्दस्य सदृशः स्वरः ।
यदा न तं स्वरं पश्येदन्यथार्थं तदा नयेत् ॥ ८९॥

एवं पदे समासे वा यत्रोदात्तो व्यवस्थितः ।
तात्पर्यं तत्र शब्दस्य स्थापयेदिति निर्णयः ॥ ९०॥

अन्धकारे च दीपेन गच्छन्न स्स्खलति क्वचित् ।
स्वरप्रकाशितश्चैवं वेदार्थे न प्रमाद्यति ॥ ९१॥

Translation:

॥उपसंहारः ॥

:-

अभ्यंकरकुलोत्पन्नस्त्र्यंबको बालदेहजः ।
समीक्ष्य संहिताः सम्यक् कृतवान् स्वरमञ्जरीम् ॥ ९२॥

वेदार्थसुखबोधाय शास्त्रीयपठणाय च ।
तस्या अध्यननं कार्यं सार्थमेव च वैदिकैः ॥ ९३॥

भू-शास्त्र-वसु-भूशाके (१८६१) श्रावणे कृष्णवैष्णवे ।
मत्पूज्यगुरुपादाभ्यां मञ्जरीयं समर्पिता ॥ ९४॥

मन्त्रश्चेत् स्वरतो हीनो वज्रं भूत्वा हिनस्ति सः ।
स एव कामधुग् भूयात् पठितश्चेद्यथास्वरम् ॥ ९५॥

Translation:

॥ इति श्री । बी । ए । इत्युपपदसमलंकृत-गीर्वाणभूषण-अभ्यंकरोपाह्व
त्र्यंबकशास्त्रिप्रणीतस्वरमञ्जरी समाप्ता ॥

Encoded and proofread by Avinash Sathaye sohum at ms.uky.edu

Some portion is not translated yet, but the
the specific portion does not seem so important for the rules
of accents . It is more general and is about the grammar rules related
to accents, is usually useless for a specific document. –Avinash.

*svarama njarI text with trans explaining Vedic accents*

pdf was typeset on March 17, 2025

Please send corrections to *sanskrit@cheerful.com*